# Shri Halasyanatha Dandakam

# श्रीहालास्यनाथदण्डकम्

## Document Information

Text title : Shri Halasyanatha Dandakam

File name : hAlAsyanAthadaNDakam.itx

Category : shiva, daNDaka

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 50 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : September 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2023

*sanskritdocuments.org*

Shri Halasyanatha Dandakam

# श्रीहालास्यनाथदण्डकम्

ॐ श्रीगणेशाय नमः ।
शुभसमुद्यमन्दिराम्भोजसम्भूतबृन्दारकेन्द्रादिबृन्दारकप्राज्ञबृन्दारकाश्रान्तमन्देतरानन्दसन्दो

रासरत्सारिणीधारणीवारसम्पातभूरीकृतावार्यमाधुर्यसौरब्यारङ्गत्तरङ्गातिसम्बाधगङ्गाझरीतीर

रुद्राक्षदामाभिरामोज्ज्वलद्भक्तिभारार्जिताग्रीयगाङ्गेयजाम्भूनदाम्भोजमुख्यप्रसूनादिकारब्धचन
सर्वसर्वंसहाभृत्प्रतीतप्रभावाञ्चिते हेमवल्लीमतल्लीसमुत्फुल्लसन्मञ्जरीपुञ्जसौभाग्यसन्दर्शनानन्
पावनाम्नायवागञ्चमाम्रेडिते प्राक्तनानेकजन्मान्तरोपात्तसत्कर्मपारम्परीपाकसंसिद्धिभान्योल्लस

तेजोमणीकन्धरामन्दराजीविराजन्नितम्बावलम्बातिसम्बाधकादम्बिनीडम्बरोद्यत्कदम्बाटवीर
भवानीभवानीदृगत्यद्भुतोद्याद्विलासैकमूले
मदोभाननस्कन्दनिःसीममोदोदयच्चरुलीले मनोवागतीतातिवैपुल्यवैमल्यसौगुण्यसम्भाव्यम
सदादेवसेवामिलद्देवानिर्वैलहेवाकसम्मर्दनिःसारणोद्दामहुङ्कारतण्डुप्रचण्डाग्रदण्डाभिघातोद्दल
नव्यरत्नाङ्कुरद्योतविद्योतिताशान्तरे ।
शान्तिदान्त्यादिकस्तीर्णविस्तीर्णपुञ्जीभवद्विद्युदुद्दाभधामप्रबन्धाभिसम्बद्धनव्येतरप्रस्पुरद्वैखरी
महेशं गिरिशं मनोवागतीतं वरेशानमव्यक्तमानम्रलोकालिनिर्निक्तभाग्योदयं
भद्रविश्राणनाभद्रविद्राणनोन्निद्रकारुण्यधारासमाविष्कृतागण्यलावण्यतारुण्यभास्वज्जगन्मोह
तटित्पुञ्जरङ्गज्जटावीथिकान्तर्नटद्वाहिनीपूरगम्भीरसम्भारसङ्गोत्तमाङ्गस्फुरच्चारुकोटीरहीरावलि
मुनिव्रातनीरागशान्तामलस्वान्तनीडोद्भवोदारनीडं श्रवःकुण्डलीभूतसन्मण्डजातं
फणिमण्डलीरत्ननिर्यत्नविर्यन्मयूखालिकिञ्जिल्किताच्छात्मगण्डं सुधासूतिरेखासुधाबिन्दुपारम
वरीयोऽब्जिनीनाथचन्द्रात्मकात्मीयनेत्रद्वयापाङ्गरस्थलीनानटल्लासिकावर्यचर्यावहोद्यद्दयाह्लादि
समुत्तुङ्गनानासमानानद्योमुद्योतमानानवद्याच्छमन्दस्मितज्योत्स्निकापूरसन्दर्शितात्मीयनिर्नि
जगद्यातनोत्पादनक्रूरहालहलाहङ्क्रियाच्छेदनप्रक्रियाख्यापितानीलकण्ठं
कराम्भोजरङ्गद्वराभीतिमुद्राकुठारैणमामुक्तमुक्तागुलुच्छार्धरत्नावलीमुख्यभूषासमुद्योतितोदार
त्रिलोकीसुखावाससीमाविभागावभास्वद्वलीनित्यरम्योदरं चारुशोभाभिसम्भिन्ननाभिं

कटीनद्धजाम्बूनदाभाम्बराच्छादिताछोरुन्चङ्गं सुधाम्भोधिनातादिमादित्यसेवातिहेवाकसम्मर्द
वर्यसर्वाभिनन्द्याङ्गसौन्दर्यसारापगानीरधिं वारिधिप्रौढतूणीरसारम् ।
सदा वामपर्यङ्कपीठाधिरूढामगूढप्रभावामुमां प्रत्नवाणीशिरोलालनीयां
नवोत्पुल्लनीरेजनीमेचकामानमन्मानसध्वान्ततिर्मोचकामुत्कदम्भीभवन्मत्तलोलम्बजालातिन
कान्तसीमन्तसीमान्तिकन्यस्तसिन्दूररागारुणामम्बिकामम्बुजालम्बितस्फीतबिम्बोकनैजाम्ब
विद्रुमप्राभावोद्रेकविद्रावकारुण्यभद्राधरां चन्द्रिकामन्दमन्दाक्षसन्दायिमन्दस्मिताखण्डराका
प्रौढजम्बीरगम्भीरिमाक्षुद्रविक्षोभदानिअकदक्षोरुवक्षोजकुम्भां कलालापिवीणामृदुक्काणवाणीं
सरोजातरागाख्यरत्नावलीनद्धसत्कङ्कणोद्भूतबालारुणारुण्यभास्यूतवज्राङ्गुलीयोज्ज्वलत्पाणिम
सदातृप्तजाम्बूनदोद्भासिबालारुणाशैणकौसुम्भादिव्याम्बरप्रावृतामस्तचाञ्चल्यसौदामिनीवीत
समानीतमन्देतरस्यन्दिमारन्दबिएन्दुच्छटानित्यसन्दानितोन्निद्रमन्दारमुख्यप्रसूनप्रवेकप्रतीत
मरुत्कामिनीकङ्कणोद्यज्झणङ्कारहस्तारविन्दोच्चलच्चामराधूतकर्णावतंसायितोत्पुल्लकल्हारनिह
रहः
शारदासम्भ्रमाख्यातहैरण्यगर्भाण्डमध्यस्थलोकालिदैनन्दिनाशेषचर्यासमाकर्णनासक्तकर्णाम
सम्भ्रमारब्धगान्धर्वगानामृतोदन्वदुद्वेलमाधुर्यसङ्गाधिकोल्लासलास्यक्रमारम्भसम्भावनीयाङ्गह
क्षमाभृत्कुलेशानबालाम् ।
अबालानुरागेण दानाभिलाषाभिसम्पादनैकानुकम्पासमाविष्कृताप्राकृताकारशोभं
महादेवमत्यन्तसत्त्वप्रतीतात्मचर्यामहायोगिवर्याः सदा नैजसन्मानसाम्भोजसिंहासने
भावयन्तोऽप्ययं वस्तुतो निस्तुलो वाङ्मनोऽतीतसर्वान्तराखण्डनीरूपसंवित्सुखात्मेति
यं चिन्तयन्तो भवान्निर्वृताः सर्वतो येन डिम्भो मृकण्डोः पुरा कालपाशेन कण्ठे
निबद्धो दृढं मृत्युवक्त्रार्धजग्धोऽपि निःशेषपाशच्छिदाधुर्ययापाङ्गदृग्धारया लीलया
पालितः प्रापितो बालचन्द्रावतंसेन जैवातृकत्वं चिरं
यस्य शीर्षाङ्घ्रिनीरेजसन्दर्शनोद्योगिनावब्जजाब्जालयानायकावक्षमावीक्षणे
हंसभूधाररूपाश्रितौ यः पुराखर्वदुर्वारगर्वाधिकोदीर्णलोकैकविद्वेषिघोरत्रिसङ्ख्यापुराधीशदैत्याधि
स्तुलोदन्तहस्तारविन्दः सुपर्वारिगर्वैकनिर्वापणायोद्यतस्तत्क्षणायातनैलिम्पनद्वाहिनीजालकं
प्रलवाणीचतुस्तुङ्गरङ्गत्तुरङ्गाभिसन्नद्धचक्रीकृतादित्यचन्द्रातिनिस्तन्द्रशोभोज्ज्वलत्सर्वसर्वंसहा
काञ्चनक्ष्माधरोदारकोदण्डमुच्चण्डकाण्डप्रकाण्डीभवत्पुण्डरीकाक्षमक्षय्यतृणीभवद्वाहिनीनाय
वर्यमौर्वीपदन्यस्तदर्वीकराधीश्वरच्छादितो युद्धसाहाय्यसन्नद्धमारात् परीतं
निराकृत्य निःसीमनैजप्रभावाधिकाम्भोधिगाम्भीर्यलेशैकदेशप्रकाशाय
सद्यःसमाविष्कृतानादरस्मेरचञ्चद्दृगाधानमात्रेण निर्लेशमुन्मूलितं वैरिसङ्घातमापादयन्
सर्वलोकार्तिमुद्रामभिद्रावयन्
नित्यवन्दारुबृन्दारकामन्दवृन्दं वितेने सदा कन्दलत्तुन्दिलानन्दसन्दानितं तादृशं
देवदेवादिमं देवतासार्वभौमोत्तमं चारुचन्द्रावतम्साङ्घ्रिनीरेजनिस्तन्द्रभृङ्गायितस्वान्तगङ्गाधरा

सपर्याभिरार्याभिराराध्यनिध्यातमध्यात्मदीपं मनोमेदुरं तं हरन्तं चिरायान्तरं तीव्रसन्तापचिन्ताभरं मामकोद्दामभाग्योदयं भूधराधीशकन्यामनोहृद्यमीशं प्रपद्येऽनवद्यं चिदानन्दमाद्यम् ।

यः कदाचिन्मदावेशनिःशङ्कलङ्केशबाहूबलोन्नीतकैलासशैलाधिकाधूतगौरीपरीरम्भसम्भावना
पादसेवासमुद्युक्तभक्तार्थसम्पादनैकानुकम्पादृताकारवत्त्वापदेशेन सञ्चालितं
चाचलं चिन्तयन् वर्यवाराणसीं यावनव्रातसद्यःसमुत्पद्यमानव्यथाधूपितामाविरिञ्चालयाहीन्द्र
महाशाम्भवस्थानभूषायमाणं समस्तागमाम्नायगीतं निरस्तार्हतोदीर्ण
चार्वाकजातं सदापूतहालास्यनामाद्भुतक्षेत्रमच्छेद्यसंसारपाशैकदात्रं पवित्र
जगत्क्षोभकल्पावसानेऽप्यसञ्जातविक्षोभमक्षीणलक्ष्मीविलासालयं सन्ततापारनीपाटवीप्रावृतं
हेमपद्माकरोत्फुल्लहेमारविन्दस्त्रवत्स्वादुमाध्वीकधारानिशास्वादमाद्यन्नलिश्रेणिझङ्कारसन्नादि
देवकान्तानिशाराध्यमीनाम्बिकासुन्दरेशाद्भुतानेकलीलास्पदीभूतमेकान्तनित्यात्मनीनं
च सञ्चिन्त्य तत्रैव माहेशदासाग्रगण्येन जन्मान्तरोपार्जितामेयभाग्योल्लसन्मुद्दुरामाख्यभूदेवव
सत्त्वैकसारान्तरोदीतनिर्निक्तनिःसीमभक्त्या प्रकृत्याऽनिकृत्या नियत्या महत्या
स्वशक्त्यानुरक्त्यानुयुक्तेन युक्त्या
समुत्पादिते शातकुम्भादिसम्भारसम्भासमानातिगम्भीरसर्वप्रियम्भावुकानेकपाञ्चालिकागुम्भ
मेरुकोटिप्रतीकाशगाङ्गेयरङ्गत्समुत्तुङ्गशृङ्गोत्तमाङ्गे स्फुरद्गोपुरद्वारसालान्तरागारकल्याणपारंप
नवद्योतमाने सुमेरूज्ज्वलत्कन्धराभोगहृद्येऽनवद्ये महाहेमनालावलम्बातिसम्बाधपद्माकृतिस्प
सन्ततामुक्तमुक्तावितानान्तरे नीरमुग्गर्भनिर्भेदनारम्भसंरम्भसम्भिन्नकाण्डध्वजानद्धपट्टांशुका
सान्द्रसम्बद्धरम्भाफलोद्गुच्छमुक्तागुलुच्छालिसङ्कुल्लकल्हारमल्लीमतल्लीप्रसूनाम्रपत्रालिशोभा
दूरनिःशेषविद्रावितोपप्लवाङ्कूरगन्धे निसर्गादिव स्वर्गभूमध्यलोकावतीर्णे
सदानिद्रभद्रैकतानस्फुरच्छाश्वतोन्निद्रसम्पद्धुराबन्धुरे सुन्दरेशालयाग्रीयभूषायिते
दिव्यसन्मन्दिरे सुन्दरे सुस्थिरामासिकामात्मनीनैरशेषैर्मुदासौ मदेभाननस्कन्दमुख्यैः
स्वशक्त्या महत्या पराशक्तिमूर्त्या समासाद्य साकं चिदानन्दरूपः शिवो विश्वनाथः
सपर्याभिरार्याभिराराधितः सुप्रसन्नः कृपासारदृष्ट्या सदा सन्दिशन् राजते
नित्यकल्याणपारम्परीं तादृशं देवमुद्यन्तमेवाद्य हृद्यं प्रपद्येऽनवद्यान्तरात्मानमाद्यं
हृदा भूयसे श्रेयसे ।

गौरीं रावणबाहुकम्पितमहाकैलासशैलासिका-
निर्विण्णां गिरिशो विचिन्त्य यवनाक्रान्तेति वाराणसीम् ।
हित्वासौ निजमुद्दुरामरचिते सौधे वसन् मोदते
हालास्येऽखिलपूजितो गिरिजया श्रीविश्वनाथोऽधुना ॥

इति श्रीहालास्यनाथदण्डकं समाप्तम् ।

(५०)

Proofread by Sivakumar Thyagarajan Iyer

*Shri Halasyanatha Dandakam*
pdf was typeset on September 23, 2023

Please send corrections to *sanskrit@cheerful.com*